June-2023

(6)

ISSN 2250-1711

Special Volume Of The National Conference

॥ प्रारब्धमुत्तमजना न परित्यजन्ति ॥

P.G. Department of Studies and Research in Sanskrit
Kuvempu University, Sahyadri College Campus, Shivamogga

॥ सत्यं ज्ञानमनन्तम् ॥

JOURNAL OF VEDA SAMSKRITA ACADEMY
(RECOGNISED IN THE UGC-CARE LIST)
[A NATIONAL PEER-REVIEWED RESEARCH JOURNAL]

# ॥ स्वास्थ्यसह्याद्रिः ॥

[राष्ट्रियसङ्गोष्ठीलेखसङ्ग्रहः]

द्विदिवसीयं राष्ट्रियसम्मेलनम्

Two Days National Conference

विषयः संस्कृतसाहित्ये स्वास्थ्यरक्षणम् ; तस्य प्रस्तुतता च

Topic : Samskrita Sahitye Swasthyarakshanam – Tasya Prastutataa Cha

प्रधानसम्पादिका
डा. एम्.ए. श्रुतिकीर्ति
Editor in Chief
**Dr. M.A. Shruthikirthi**

सह–सम्पादकः
डा. काशीनाथ शास्त्री हेच्. वि.
Co-Editor
**Dr. Kashinath Shastry H.V.**

प्रकाशनसंस्था
वेदसंस्कृत–अकाडेमि (पं.), हेगडे–581330
Website : www.vedasamskritaacademy.org
E-mail : vedasmkac@gmail.com

Scanned with CamScanner

30/4/24

ISSN 2250-1711
"स्वास्थ्यसह्याद्रिः"
राष्ट्रियसङ्गोष्ठीलेखसङ्ग्रहः

# माघकृतौ स्वास्थ्यसंरक्षणसन्देशः

रिया-पालः
शोधच्छात्रा, संस्कृतविभागस्य
बाँकुड़ा-विश्वविद्यालयस्य, पश्चिमवङ्गस्थस्य
Contact - 7031707927
riyapalsanskrit10@gmail.com

**उपोद्घातः –**

संस्कृतवाङ्मयोदधेर्भासुरं रत्नं खलु महाकविर्माघः। कवेरस्य समयविषये मतानि बहुधा भिद्यन्ते। यद्यपि नाद्यावधि कोऽपि हृदयङ्गमो निर्णय उपालम्भि तथापि यशस्तिलकचम्पूनाम्नि प्रबन्धे सूरिवरेण सोमदेवेन महाकविमाघस्योल्लेखो विहितः। आनन्दवर्धनाचार्येण ध्वन्यालोके शिशुपालवधस्य श्लोकद्वयमुद्धृतमिति नैतत्प्रतिपत्तुं दुष्करं यदेताभ्यां पूर्वतनो हि माघः। साहित्यविदां नये कविरसौ माघः नवशताब्द्याः पूर्वार्द्धभागे विराजते स्म। माघविरचितं शिशुपालवधं नाम महाकाव्यं विंशतिसर्गसंप्रथितं पञ्चाशदुत्तरषोडशशतमितैः पद्यैः परिगुम्फितम्। अस्य कथावस्तु महाभारतादेव सङ्कलितम्। काव्ये अस्मिन् कवेः प्रौढिमा, दृढबन्धः, प्रागल्भ्यं प्रतिपदं समुच्छलतीव प्रतिभाति। नास्ति च तादृशी काचित् कला यन्न काव्याङ्गं जायते, अतो काव्यप्रणेतृभिः कविभिः सकलकलाविद्भिरेव भूयते। महाकवेः माघस्य कृतावपि सकलासु कलासु कवेरस्य वैचक्षण्यं विपश्चितां हरति चेतांसि। अत्रास्मत्प्रबन्धे आयुर्वेदकलायां महाकविवरस्य वैदुष्यवैदूर्यं कथं स्वभासा भासमानं सहृदयहृदयमप्यदीप्यत तदेव बद्धुं प्रयासो विधीयते।

**रोगवर्धनस्थगनम् –**

यथा सद्यो जातो वटवृक्ष उपेक्ष्यते चेद्भाविनि काले स एव वटवृक्षो छेदनाशक्यो भवति तथैव रोगः प्राथमिकदशायामुपेक्ष्यमाणो भाविनि भवति मृतिहेतुः। अतो प्राथमिकावस्थायां हि रोगनाशाय रोगवर्धनच्छेदनाय वा उद्योतैर्भाव्यं सर्वैः। यस्तु प्रज्ञावान् यथोचितकालं रुजं यथायथं निर्णीय प्रतिकारं विदधाति स एव परिणामतः परमां प्रीतिमवाप्नोतीह। आचार्येण चरकेण चरकसंहितायां निरुक्तम् –सद्योजातो रोगः सरलतयानायासमपनेतुं शक्यः। महाकविना माघेनापि अयमेव विषयउपमामुखेन वर्णितः। माघनये रोगः शत्रुश्च द्वावेव समानौ हानिकारकाविति वर्धमानः शत्रुः रोगश्च मतिमता नोपेक्ष्यौ। तथाहि उक्तम् –

> उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च।[1]

**शरीरानुगुणं रसायनसेवनम् –**

चरकमते संयमो हि महौषधिः। किञ्च, रसायनसेवने अपि भूतिमिच्छता संयम एव समाश्रयणीयः। तथाहि विविधानां रसायनानां प्रभावः शरीरे कथं सङ्गच्छेदिति शारीरिकसहनक्षमतां विचार्यैव संयमेन रसायनं सेव्यम्। महाकविना माघेनापि रसायनसेवने सहनशक्तेरुपयोगित्वं भृशं स्वीकृतम् –

> षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षो रसायनम्। भवन्त्यस्यैवमङ्गानि स्थानूनि बलवन्ति च।।[2] इति।

---

१. शिशुपालवधमहाकाव्ये, २.१०

२. तत्रैव, २-९३

Scanned with CamScanner